ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

# पद पाठः (वाक्य सहित)

## तृतीयकाण्डे पञ्चमः प्रश्नः

**Notes:**

- **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0** **November 30, 2020**

## Version Notes:

**This is now the current Version 1.0 dated November 30, 2020.**

1. This replaces the earlier version 0.0 dated July 31, 2019.

2. This version has been updated with the errors found and reported till November 15, 2020.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st January 2019 |
| 2nd | Version Number | 0.0 dated 31st July 2019 |

## Table of Contents


3 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायं पद पाठे तृतीयं काण्डं ........ 4

3.5 तृतीयकाण्डे पञ्चमः प्रश्नः – इष्टिशेषाभिधानं ........ 4

ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः

हरिः ओं

# 3 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायं पद पाठे तृतीयं काण्डं

## 3.5 तृतीयकाण्डे पञ्चमः प्रश्नः – इष्टिशेषाभिधानं

**TS 3.5.1.1**

पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मद्ध्यतः पौर्णमासी जिगाय ।
तस्यां देवा अधि सँवसन्त उत्तमे नाक इह मादयन्तां ॥
यत्ते देवा अदधु र्भागधेयममावास्ये सँवसन्तो महित्वा ।
सा नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरं ॥
निवेशनी सङ्गमनी वसूनां ँविश्वा रूपाणि वसून्यावेशयन्ती ।
सहस्रपोष८ं सुभगा रराणा सा न आ गन् वर्चसा – [ ] 1

**TS 3.5.1.1 - Padam**

पूर्णा । पश्चात् । उत । पूर्णा । पुरस्तात् । उदिति । मद्ध्यतः ।
पौर्णमासीति पौर्ण – मासी । जिगाय ॥ तस्याम् । देवाः । अधीति ।

सँवसन्त इति सं – वसन्तः । उत्तम इत्युत् – तमे । नाके । इह ।
मादयन्ताम् ॥ यत् । ते । देवाः । अदधुः । भागधेयमिति
भाग – धेयम् । अमावास्य इत्यमा – वास्ये । सँवसन्त इति
सं – वसन्तः । महित्वेति महि–त्वा ॥ सा । नः । यज्ञम् । पिपृहि ।
विश्ववार इति विश्व – वारे । रयिम् । नः । धेहि । सुभग इति
सु – भगे । सुवीरमिति सु – वीरम् ॥ निवेशनीति नि – वेशनी ।
सङ्गमनीति सं – गमनी । वसूनाम् । विश्वा । रूपाणि । वसूनि ।
आवेशयन्तीत्या – वेशयन्ती ॥ सहस्रपोषमिति सहस्र – पोषम् ।
सुभगेति सु–भगा । रराणा । सा । नः । एति । गन्न् ।
वर्चसा । **1 (50)**

**<u>TS 3.5.1.2</u>**

सँविदाना ॥

अग्नीषोमौ प्रथमौ वीर्येण वसून् रुद्रानादित्यानिह जिन्वतं ।
माद्ध्यꣳ हि पौर्णमासं जुषेथां ब्रह्मणा वृद्धौ सुकृतेन
सातावथाऽस्मभ्यꣳ सहवीराꣳ रयिं नि यच्छतं ॥

आदित्याश्चाऽङ्गिरसश्चाग्नीनाऽदधत ते दर्.शपूर्णमासौ प्रैफ्सन्
तेषामङ्गिरसां निरुप्तꣳ हविरासीदथाऽऽ*दित्या एतौ
होमावपश्यन् तावजुहवुस्ततो वै ते दर्.शपूर्णमासौ – [ ] 2

**TS 3.5.1.2 - Padam**

सँविदानेति सं – विदाना ॥ अग्नीषोमावित्यग्नी – सोमौ । प्रथमौ ।
वीर्येण । वसून् । रुद्रान् । आदित्यान् । इह । जिन्वतम् ॥ माद्ध्यम् ।
हि । पौर्णमासमिति पौर्ण – मासम् । जुषेथाम् । ब्रह्मणा । वृद्धौ ।
सुकृतेनेति सु – कृतेन । सातौ । अथ । अस्मभ्यमित्यस्म–भ्यम् ।
सहवीरामिति सह–वीराम् । रयिम् । नीति । यच्छतम् ॥ आदित्याः ।
च । अङ्गिरसः । च । अग्नीन् । एति । अदधत । ते ।
दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । प्रेति । ऐफ्सन्न् । तेषाम् ।
अङ्गिरसाम् । निरुप्तमिति निः – उप्तम् । हविः । आसीत् । अथ ।
आदित्याः । एतौ । होमौ । अपश्यन्न् । तौ । अजुहवुः । ततः । वै ।
ते । दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । 2 (50)

**TS 3.5.1.3**

पूर्व आ ऽलभन्त दर्.शपूर्णमासा–वालभमान एतौ होमौ

पुरस्ताज्जुहुयाथ् साक्षादेव दर्.शपूर्णमासावा लभते ब्रह्मवादिनो

वदन्ति स त्वै दर्.शपूर्णमासावा लभेत य एनयोरनु–लोमञ्च

प्रतिलोमञ्च विद्यादित्यमावास्याया ऊर्द्ध्वं तदनुलोमं पौर्णमास्यै

प्रतीचीनं तत् प्रतिलोमं ँयत् पौर्णमासीं पूर्वामालभेत

प्रतिलोममेनावा लभेतामुमपक्षीयमाण–मन्वप – [ ] **3**

**TS 3.5.1.3 - Padam**

पूर्वे । एति । अलभन्त । दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ ।

आलभमान इत्या–लभमानः । एतौ । होमौ । पुरस्तात् । जुहुयात् ।

साक्षादिति स – अक्षात् । एव ।

दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । एति । लभेते ।

ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति । सः । तु । वै ।

दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । एति । लभेत । यः ।

एनयोः । अनुलोममित्यनु – लोमम् । च ।

प्रतिलोममिति प्रति – लोमम् । च । विद्यात् । इति ।

अमावास्याया इत्यमा – वास्यायाः । ऊर्द्ध्वम् । तत् ।

अनुलोममित्यनु – लोमम् । पौर्णमास्या इति पौर्ण – मास्यै ।

प्रतीचीनम् । तत् । प्रतिलोममिति प्रति – लोमम् । यत् ।

पौर्णमासीमिति पौर्ण – मासीम् । पूर्वाम् । आलभेतेत्या – लभेत ।

प्रतिलोममिति प्रति–लोमम् । एनौ । एति । लभेत । अमुम् ।

अपक्षीयमाणमित्यप – क्षीयमाणम् । अनु । अपेति । **3 (50)**

**<u>TS 3.5.1.4</u>**

क्षीयेत सारस्वतौ होमौ पुरस्ताज्जुहुयादमावास्या वै

सरस्वत्यनुलोम–मेवैनावा लभते ऽमुमाप्यायमानमन्वा प्यायत

आग्नावैष्णव–मेकादशकपालं पुरस्तान्निर्वपेथ् सरस्वत्यै चरु॑ं

सरस्वते द्वादशकपालं ँयदाग्नेयो भवत्यग्निर्वै यज्ञमुखं

ँयज्ञमुखमेवर्द्धिं पुरस्ताद्–धत्ते यद्–वैष्णवो भवति यज्ञो वै

विष्णुर्यज्ञमेवाऽऽ*रभ्य प्र तनुते सरस्वत्यै ( ) चरुर्भवति सरस्वते

द्वादशकपालोऽमावास्या वै सरस्वती पूर्णमासः सरस्वान् तावेव

साक्षादा रभत ऋद्ध्नोत्याभ्यां द्वादशकपालः सरस्वते भवति मिथुनत्वाय प्रजात्यै मिथुनौ गावौ दक्षिणा समृद्ध्यै ॥ 4

**TS 3.5.1.4 - Padam**

क्षीयेते । सारस्वतौ । होमौ । पुरस्तात् । जुहुयात् ।
अमावास्येत्यमा–वास्या । वै । सरस्वती । अनुलोममित्यनु–लोमम् ।
एव । एनौ । एति । लभेते । अमुम् ।
आप्यायमानमित्या – प्यायमानम् । अनु । एति । प्यायते ।
आग्नावैष्णवमित्याग्ना – वैष्णवम् ।
एकादशकपालमित्येकादश–कपालम् । पुरस्तात् । निरिति । वपेत् ।
सरस्वत्यै । चरुम् । सरस्वते । द्वादशकपालमिति द्वादश–कपालम् ।
यत् । आग्नेयः । भवति । अग्निः । वै । यज्ञमुखमिति यज्ञ–मुखम् ।
यज्ञमुखमिति यज्ञ–मुखम् । एव । ऋद्धिम् । पुरस्तात् । धत्ते । यत् ।
वैष्णवः । भवति । यज्ञः । वै । विष्णुः । यज्ञम् । एव ।
आरभ्येत्या – रभ्य । प्रेति । तनुते । सरस्वत्यै ( ) । चरुः । भवति ।
सरस्वते । द्वादशकपाल इति द्वादश–कपालः ।

अमावास्येत्यमा – वास्या । वै । सरस्वती । पूर्णमास इति पूर्ण – मासः । सरस्वान् । तौ । एव । साक्षादिति स – अक्षात् । एति । रभते । ऋद्ध्नोति । आभ्याम् । द्वादशकपाल इति द्वादश – कपालः । सरस्वते । भवति । मिथुनत्वायेति मिथुन – त्वाय । प्रजात्या इति प्र – जात्यै । मिथुनौ । गावौ । दक्षिणा । समृद्ध्या इति सं – ऋद्ध्यै ॥ **4 (75)**

*(वर्चसा – वै ते दर्.शपूर्णमासा – वप – तनुते सरस्वत्यै – पञ्चविंशतिश्च) (A1)*

**TS 3.5.2.1**

ऋषयो वा इन्द्रं प्रत्यक्षं नापश्यन् तं ँवसिष्ठः प्रत्यक्षमपश्यथ् सोऽब्रवीद्–ब्राह्मणं ते वक्ष्यामि यथा त्वत्पुरोहिताः प्रजाः प्रजनिष्यन्तेऽथ मेतरेभ्य ऋषिभ्यो मा प्र वोच इति तस्मा एतान्थ्स्तोमभागानब्रवीत् ततो वसिष्ठपुरोहिताः प्रजाः प्राजायन्त तस्माद्–वासिष्ठो ब्रह्मा कार्यः प्रैव जायते रश्मिरसि क्षयाय त्वा क्षयं जिन्व – [ ] **5**

**TS 3.5.2.1 - Padam**

ऋषयः । वै । इन्द्रम् । प्रत्यक्षमिति प्रति – अक्षम् । न । अपश्यन्न् ।
तम् । वसिष्ठः । प्रत्यक्षमिति प्रति – अक्षम् । अपश्यत् । सः ।
अब्रवीत् । ब्राह्मणम् । ते । वक्ष्यामि । यथा । त्वत्पुरोहिता इति
त्वत् – पुरोहिताः । प्रजा इति प्र – जाः । प्रजनिष्यन्त इति
प्र – जनिष्यन्ते । अथ । मा । इतरेभ्यः । ऋषिभ्य इत्यृषि – भ्यः ।
मा । प्रेति । वोचः । इति । तस्मै । एतान् । स्तोमभागानिति
स्तोम – भागान् । अब्रवीत् । ततः । वसिष्ठपुरोहिता इति
वसिष्ठ – पुरोहिताः । प्रजा इति प्र – जाः । प्रेति । अजायन्त ।
तस्मात् । वासिष्ठः । ब्रह्मा । कार्यः । प्रेति । एव । जायते । रश्मिः ।
असि । क्षयाय । त्वा । क्षयम् । जिन्व । इति । **5 (50)**

**TS 3.5.2.2**

–त्याह देवा वै क्षयो देवेभ्य एव यज्ञं प्राऽऽ*ह प्रेतिरसि धर्माय
त्वा धर्मं जिन्वेत्याह मनुष्या वै धर्मो मनुष्येभ्य एव यज्ञं

प्राऽऽ*हान्वितिरसि दिवे त्वा दिवं जिन्वेत्याहैभ्य एव लोकेभ्यो यज्ञं

प्राऽऽ*हविष्टम्भोऽसि वृष्ट्यै त्वा वृष्टिं जिन्वेत्याह वृष्टिमेवाव – [ ] **6**

**TS 3.5.2.2 - Padam**

आह । देवाः । वै । क्षयः । देवेभ्यः । एव । यज्ञम् । प्रेति । आह ।

प्रेतिरिति प्र – इतिः । असि । धर्माय । त्वा । धर्मम् । जिन्व ।

इति । आह । मनुष्याः । वै । धर्मः । मनुष्येभ्यः । एव । यज्ञम् ।

प्रेति । आह । अन्वितिरित्यनु–इतिः । असि । दिवे । त्वा । दिवम् ।

जिन्व । इति । आह । एभ्यः । एव । लोकेभ्यः । यज्ञम् । प्रेति ।

आह । विष्टंभ इति वि – स्तंभः । असि । वृष्ट्यै । त्वा । वृष्टिम् ।

जिन्व । इति । आह । वृष्टिम् । एव । अवेति । **6 (50)**

**TS 3.5.2.3**

रुन्धे प्रवाऽस्यनुवाऽसीत्याह मिथुनत्वायोशिगसि वसुभ्यस्त्वा

वसूञ्जिन्वेत्याहाष्टौ वसव एकादश रुद्रा द्वादशाऽऽ*दित्या एतावन्तो

वै देवास्तेभ्य एव यज्ञं प्राऽऽ*हौजोऽसि पितृभ्यस्त्वा पितॄन्

जिन्वेत्याह देवानेव पितॄननु सन्तनोति तन्तुरसि प्रजाभ्यस्त्वा

प्रजा जिन्वे – [ ] **7**

**TS 3.5.2.3 - Padam**

रुन्धे । प्रवेति प्र – वा । असि । अनुवेत्यनु – वा । असि । इति ।

आह । मिथुनत्वायेति मिथुन – त्वाय । उशिक् । असि ।

वसुभ्य इति वसु – भ्यः । त्वा । वसून् । जिन्व । इति । आह ।

अष्टौ । वसवः । एकादश । रुद्राः । द्वादश । आदित्याः । एतावन्तः ।

वै । देवाः । तेभ्यः । एव । यज्ञम् । प्रेति । आह । ओजः । असि ।

पितृभ्य इति पितृ – भ्यः । त्वा । पितॄन् । जिन्व । इति । आह ।

देवान् । एव । पितॄन् । अनु । समिति । तनोति । तन्तुः । असि ।

प्रजाभ्य इति प्र – जाभ्यः । त्वा । प्रजा इति प्र – जाः ।

जिन्व । **7 (50)**

**TS 3.5.2.4**

–त्याह पितृनेव प्रजा अनु सन्तनोति पृतनाषाडसि पशुभ्यस्त्वा

पशूञ्जिन्वेत्याह प्रजा एव पशूननु सन्तनोति

रेवदस्योषधीभ्यस्त्वौषधी र्जिन्वेत्याहौषधीष्वेव पशून् प्रति

ष्ठापयत्यभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्वेत्याहाभिजित्या अधिपतिरसि प्राणाय त्वा प्राणं – [ ] **8**

**TS 3.5.2.4 - Padam**

इति । आह । पितॄन् । एव । प्रजा इति प्र – जाः । अनु । समिति । तनोति । पृतनाषाट् । असि । पशुभ्य इति पशु – भ्यः । त्वा । पशून् । जिन्व । इति । आह । प्रजा इति प्र – जाः । एव । पशून् । अनु । समिति । तनोति । रेवत् । असि । ओषधीभ्य इत्योषधि – भ्यः । त्वा । ओषधीः । जिन्व । इति । आह । ओषधीषु । एव । पशून् । प्रतीति । स्थापयति । अभिजिदित्यभि – जित् । असि । युक्तग्रावेति युक्त – ग्रावा । इन्द्राय । त्वा । इन्द्रम् । जिन्व । इति । आह । अभिजित्या इत्यभि – जित्यै । अधिपतिरित्यधि – पतिः । असि । प्राणायेति प्र – अनाय । त्वा । प्राणमिति प्र–अनम् । **8 (50)**

**TS 3.5.2.5**

जिन्वेत्याह प्रजास्वेव प्राणान् दधाति त्रिवृदसि प्रवृदसीत्याह

मिथुनत्वाय सꣳरोहोऽसि नीरोहोऽसीत्याह प्रजात्यै वसुकोऽसि

वेषश्रिरसि वस्यष्टिरसीत्याह प्रतिष्ठित्यै ॥ **9**

**TS 3.5.2.5 - Padam**

जिन्व । इति । आह । प्रजास्विति प्र – जासु । एव । प्राणानिति

प्र – अनान् । दधाति । त्रिवृदिति त्रि – वृत् । असि । प्रवृदिति

प्र – वृत् । असि । इति । आह । मिथुनत्वायेति मिथुन – त्वाय ।

सꣳरोह इति सं – रोहः । असि । नीरोह इति निः – रोहः ।

असि । इति । आह । प्रजात्या इति प्र – जात्यै । वसुकः । असि ।

वेषश्रिरिति वेष – श्रिः । असि । वस्यष्टिः । असि । इति ।

आह । प्रतिष्ठित्या इति प्रति – स्थित्यै ॥ **9 (30)**

***(जिन्वेत्य – व – प्रजा जिन्व – प्राणन् – त्रिꣳशच्च)(A2)***

**TS 3.5.3.1**

अग्निना देवेन पृतना जयामि गायत्रेण छन्दसा त्रिवृता स्तोमेन

रथन्तरेण साम्ना वषट्कारेण वज्रेण पूर्वजान् भ्रातृव्यानधरान्

पादयाम्यवैनान् बाधे प्रत्येनान्नुदेऽस्मिन् क्षयेऽस्मिन् भूमिलोके योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मो विष्णोः क्रमेणाऽत्येनान् क्रामामीन्द्रेण देवेन पृतना जयामि त्रैष्टुभेन छन्दसा पञ्चदशेन स्तोमेन बृहता साम्ना वषट्कारेण वज्रेण – [ ] **10**

**TS 3.5.3.1 - Padam**

अग्निना । देवेन । पृतनाः । जयामि । गायत्रेण । छन्दसा । त्रिवृतेति त्रि – वृता । स्तोमेन । रथन्तरेणेति रथं – तरेण । साम्ना । वषट्कारेणेति वषट् – कारेण । वज्रेण । पूर्वजानिति पूर्व – जान् । भ्रातृव्यान् । अधरान् । पादयामि । अवेति । एनान् । बाधे । प्रतीति । एनान् । नुदे । अस्मिन्न् । क्षये । अस्मिन्न् । भूमिलोक इति भूमि – लोके । यः । अस्मान् । द्वेष्टि । यम् । च । वयम् । द्विष्मः । विष्णोः । क्रमेण । अतीति । एनान् । क्रामामि । इन्द्रेण । देवेन । पृतनाः । जयामि । त्रैष्टुभेन । छन्दसा । पञ्चदशेनेति पञ्च – दशेन । स्तोमेन । बृहता । साम्ना । वषट्कारेणेति वषट् – कारेण । वज्रेण । **10 (50)**

**TS 3.5.3.2**

सहजान्. विश्वेभिर्देवेभिः पृतना जयामि जागतेन छन्दसा सप्तदशेन स्तोमेन वामदेव्येन साम्ना वषट्कारेण वज्रेणा परजानिन्द्रेण सयुजो वय७ सासह्याम पृतन्यतः ।

घ्नन्तो वृत्राण्यप्रति ।

यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं ँयत्ते अग्ने वर्चस्तेनाहं ँवर्चस्वी भूयासं ँयत्ते अग्ने हरस्तेनाह७ हरस्वी भूयासं ॥ **11**

**TS 3.5.3.2 - Padam**

सहजानिति सह – जान् । विश्वेभिः । देवेभिः । पृतनाः । जयामि । जागतेन । छन्दसा । सप्तदशेनेति सप्त – दशेन । स्तोमेन । वामदेव्येनेति वाम–देव्येन । साम्ना । वषट्कारेणेति वषट् – कारेण । वज्रेण । अपरजानित्यपर – जान् । इन्द्रेण । सयुज इति स–युजः । वयम् । सासह्याम । पृतन्यतः ॥ घ्नन्तः । वृत्राणि । अप्रति ॥ यत् । ते । अग्ने । तेजः । तेन । अहम् । तेजस्वी । भूयासम् । यत् । ते । अग्ने । वर्चः । तेन । अहम् । वर्चस्वी । भूयासम् । यत् । ते ।

अग्ने । हरः । तेन । अहम् । हरस्वी । भूयासम् ॥ **11 (46)**

*(बृहता साम्ना वषट्कारेण वज्रेण – षट्चत्वारिꣳशच्च) (A3)*

**TS 3.5.4.1**

ये देवा यज्ञहनो यज्ञमुषः पृथिव्यामद्ध्यासते ।

अग्निर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयं ॥

आऽगन्म मित्रावरुणा वरेण्या रात्रीणां भागो युवयोर्यो अस्ति ।

नाकं गृह्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः ॥

ये देवा यज्ञहनो यज्ञमुषोऽन्तरिक्षेऽद्ध्यासते ।

वायुर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयं ॥

यास्ते रात्रीः सवित – [ ] **12**

**TS 3.5.4.1 - Padam**

ये । देवाः । यज्ञहन इति यज्ञ – हनः । यज्ञमुष इति यज्ञ – मुषः ।

पृथिव्याम् । अधीति । आसते ॥ अग्निः । मा । तेभ्यः । रक्षतु ।

गच्छेम । सुकृत इति सु – कृतः । वयम् ॥ एति । अगन्म ।

मित्रावरुणेति मित्रा–वरुणा । वरेण्या । रात्रीणाम् । भागः । युवयोः ।

यः । अस्ति ॥ नाकम् । गृह्णानाः । सुकृतस्येति सु – कृतस्य ।

लोके । तृतीये । पृष्ठे । अधीति । रोचने । दिवः ॥ ये । देवाः ।
यज्ञहन इति यज्ञ – हनः । यज्ञमुष इति यज्ञ – मुषः । अन्तरिक्षे ।
अधीति । आसते ॥ वायुः । मा । तेभ्यः । रक्षतु । गच्छेम ।
सुकृत इति सु – कृतः । वयम् ॥ याः । ते । रात्रीः ।
सवितः । **12 (50)**

**TS 3.5.4.2**

–र्देवयानीरन्तरा द्यावापृथिवी वियन्ति ।
गृहैश्च सर्वैः प्रजया न्वग्रे सुवो रुहाणास्तरता रजाꣳसि ॥
ये देवा यज्ञहनो यज्ञमुषो दिव्यद्ध्यासते ।
सूर्यो मा तेभ्यो रक्षतु गच्छेम सुकृतो वयं ॥
येनेन्द्राय समभरः पयाꣳस्युत्तमेन हविषा जातवेदः ।
तेनाऽग्ने त्वमुत वर्द्धयेमꣳ सजातानाꣳ श्रैष्ठ्य आ धेह्येनं ॥
यज्ञहनो वै देवा यज्ञमुषः – [ ] **13**

**TS 3.5.4.2 - Padam**

देवयानीरिति देव – यानीः । अन्तरा । द्यावापृथिवी इति

द्यावा – पृथिवी । वियन्तीति वि – यन्ति ॥ गृहैः । च । सर्वैः ।

प्रजयेति प्र – जया । नु । अग्रे । सुवः । रुहाणाः । तरत ।

रजाꣳसि ॥ ये । देवाः । यज्ञहन इति यज्ञ – हनः ।

यज्ञमुष इति यज्ञ – मुषः । दिवि । अधीति । आसते ॥ सूर्यः । मा ।

तेभ्यः । रक्षतु । गच्छेम । सुकृत इति सु – कृतः । वयम् ॥

येन । इन्द्राय । समभर इति सं – अभरः । पयाꣳसि ।

उत्तमेनेत्युत् – तमेन । हविषा । जातवेद इति जात – वेदः ॥

तेन । अग्ने । त्वम् । उत । वर्द्धय । इमम् ।

सजातानामिति स – जातानाम् । श्रैष्ठ्ये । एति । धेहि । एनम् ॥

यज्ञहन इति यज्ञ – हनः । वै । देवाः ।

यज्ञमुष इति यज्ञ – मुषः । **13 (50)**

**TS 3.5.4.3**

सन्ति त एषु लोकेष्वासत आददाना विमथ्नाना यो ददाति यो

यजते तस्य ।

ये देवा यज्ञहनः पृथिव्यामद्ध्यासते ये अन्तरिक्षे ये दिवीत्याहेमानेव लोका ऽस्तीर्त्वा सगृहः सपशुः सुवर्गं ँलोकमेत्यप वै सोमेनेजानाद् देवताश्च यज्ञश्च क्रामन्त्याग्नेयं पञ्चकपालमुदवसानीयं निर्वपेदग्निः सर्वा देवताः – [ ] 14

**TS 3.5.4.3 - Padam**

सन्ति । ते । एषु । लोकेषु । आसते । आददाना इत्या – ददानाः । विमथ्नाना इति वि–मथ्नानाः । यः । ददाति । यः । यजते । तस्य ॥ ये । देवाः । यज्ञहन इति यज्ञ – हनः । पृथिव्याम् । अधीति । आसते । ये । अन्तरिक्षे । ये । दिवि । इति । आह । इमान् । एव । लोकान् । तीर्त्वा । सगृह इति स – गृहः । सपशुरिति स – पशुः । सुवर्गमिति सुवः – गम् । लोकम् । एति । अपेति । वै । सोमेन । ईजानात् । देवताः । च । यज्ञः । च । क्रामन्ति । आग्नेयम् । पञ्चकपालमिति पञ्च – कपालम् । उदवसानीयमित्युत् – अवसानीयम् । निरिति । वपेत् । अग्निः । सर्वाः । देवताः । **14 (50)**

**TS 3.5.4.4**

पाङ्क्तो य॒ज्ञो दे॒वता॒श्चैव य॒ज्ञञ्चाव रुन्धेगाय॒त्रो वा अ॒ग्निर्गा॒यत्र

छन्दा॒स्तं छन्द॒सा व्यर्द्धय॒ति यत् पञ्चकपालं क॒रोत्य॒ष्टाकपालः

का॒र्यो॑ऽष्टाक्षरा गाय॒त्री गा॒यत्रो॑ऽग्निर्गा॒यत्र॒छन्दाः स्वेनै॒वै॒नं छन्द॒सा

स॒मर्द्धयति प॒ङ्क्त्यौ याज्यानु॒वाक्ये भव॒तः पाङ्क्तो य॒ज्ञस्ते॒नैव

य॒ज्ञान्नैति ॥ **15**

**TS 3.5.4.4 - Padam**

पाङ्क्तः । य॒ज्ञः । दे॒वताः । च॒ । ए॒व । य॒ज्ञम् । च॒ । अवेति । रु॒न्धे॒ ।

गा॒य॒त्रः । वै । अ॒ग्निः । गा॒य॒त्रछ॒न्दा इति गाय॒त्र – छ॒न्दा॒ः । तम् ।

छन्दसा । वीति । अ॒र्द्ध॒य॒ति॒ । यत् । पञ्चकपा॒लमि॒ति

पञ्च – क॒पा॒ल॒म् । क॒रोति । अ॒ष्टाकपा॒ल इ॒त्यष्टा – क॒पा॒ल॒ः ।

का॒र्यः । अ॒ष्टा॒क्ष॒रेत्यष्टा – अ॒क्ष॒रा । गा॒य॒त्री । गा॒य॒त्रः । अ॒ग्निः ।

गा॒य॒त्रछ॒न्दा इति गाय॒त्र – छ॒न्दा॒ः । स्वेन । ए॒व । ए॒न॒म् ।

छन्दसा । समिति । अ॒र्द्ध॒य॒ति॒ । प॒ङ्क्त्यौ । या॒ज्या॒नु॒वा॒क्ये इति

याज्या – अ॒नु॒वा॒क्ये । भ॒व॒तः । पाङ्क्तः । य॒ज्ञः । तेन । ए॒व । य॒ज्ञात् ।

न । ए॒ति॒ ॥ **15 (43)**

*(सवित – देवा यज्ञमुषः – सर्वा देवता – स्त्रिचत्वारिꣳशच्च)*
*(A4)*

**TS 3.5.5.1**

सूर्यो मा देवो देवेभ्यः पातु वायुरन्तरिक्षाद्–यजमानोऽग्निर्मा पातु चक्षुषः ।

सक्ष शूष सवितर्विश्वचर्.षण एतेभिः सोम नामभिर्विधेम ते तेभिः सोम नामभिर्विधेम ते ॥

अहं परस्तादहमवस्तादहं ज्योतिषा वि तमो ववार ।

यदन्तरिक्षं तदु मे पिताऽभूदहꣳ सूर्यमुभयतो ददर्.शाहं भूयासमुत्तमः समानाना – [ ] **16**

**TS 3.5.5.1 - Padam**

सूर्यः । मा । देवः । देवेभ्यः । पातु । वायुः । अन्तरिक्षात् । यजमानः । अग्निः । मा । पातु । चक्षुषः ॥ सक्ष । शूष । सवितः । विश्वचर्.षण इति विश्व – चर्.षणे । एतेभिः । सोम । नामभिरिति नाम – भिः । विधेम । ते । तेभिः । सोम । नामभिरिति नाम–भिः । विधेम । ते ॥ अहम् । परस्तात् । अहम् ।

अवस्तात् । अहम् । ज्योतिषा । वीति । तमः । ववार ॥ यत् ।
अन्तरिक्षम् । तत् । उ । मे । पिता । अभूत् । अहम् । सूर्यम् ।
उभयतः । ददर्.श । अहम् । भूयासम् । उत्तम इत्युत् – तमः ।
समानानाम् । **16 (50)**

**TS 3.5.5.2**

मा समुद्रादाऽन्तरिक्षात् प्रजापतिरुदधिं च्यावयातीन्द्रः
प्र स्नौतु मरुतो वर्.षयन्तून्नम्भय पृथिवीं भिन्धीदं दिव्यं नभः ।
उद्नो दिव्यस्य नो देहीशानो वि सृजा दृतिं ॥
पशवो वा एते यदादित्य एष रुद्रो यदग्निरोषधीः प्रास्याग्नावादित्यं
जुहोति रुद्रादेव पशूनन्तर्दधात्यथो ओषधीष्वेव पशून् – [ ] **17**

**TS 3.5.5.2 - Padam**

एति । समुद्रात् । एति । अन्तरिक्षात् । प्रजापतिरिति प्रजा – पतिः ।
उदधिमित्युद – धिम् । च्यावयाति । इन्द्रः । प्रेति । स्नौतु । मरुतः ।
वर्.षयन्तु । उदिति । नंभय । पृथिवीम् । भिन्धि । इदम् । दिव्यम् ।
नभः ॥ उद्नः । दिव्यस्य । नः । देहि । ईशानः । वीति । सृज ।
दृतिम् ॥ पशवः । वै । एते । यत् । आदित्यः । एषः । रुद्रः । यत् ।

अग्निः । ओषधीः । प्रास्येति प्र – अस्य । अग्नौ । आदित्यम् ।
जुहोति । रुद्रात् । एव । पशून् । अन्तः । दधाति । अथो इति ।
ओषधीषु । एव । पशून् । **17 (50)**

**TS 3.5.5.3**

प्रति ष्ठापयति कविर्यज्ञस्य वि तनोति पन्थां नाकस्य पृष्ठे अधि
रोचने दिवः ।
येन हव्यं ँवहसि यासि दूत इतः प्रचेता अमुतः सनीयान् ॥
यास्ते विश्वाः समिधः सन्त्यग्नेयाः पृथिव्यां बर्.हिषि सूर्ये याः ।
तास्ते गच्छन्त्वाहुतिं घृतस्य देवायते यजमानाय शर्म ॥
आशासानः सुवीर्यं॑ रायस्पोष॑ स्वश्वियं ।
बृहस्पतिना राया स्वगाकृतो मह्यं ँयजमानाय ( ) तिष्ठ ॥ **18**

**TS 3.5.5.3 - Padam**

प्रतीति । स्थापयति । कविः । यज्ञस्य । वीति । तनोति । पन्थाम् ।
नाकस्य । पृष्ठे । अधीति । रोचने । दिवः ॥ येन । हव्यम् । वहसि ।
यासि । दूतः । इतः । प्रचेता इति प्र–चेताः । अमुतः । सनीयान् ॥

याः । ते । विश्वाः । समिध इति सं – इधः । सन्ति । अग्ने । याः ।

पृथिव्याम् । बर्.हिषि । सूर्ये । याः ॥ ताः । ते । गच्छन्तु ।

आहुतिमित्या – हुतिम् । घृतस्य । देवायत इति देव – यते ।

यजमानाय । शर्म ॥ आशासान इत्या – शासानः । सुवीर्यमिति

सु – वीर्यम् । रायः । पोषम् । स्वश्वियमिति सु – अश्वियम् ॥

बृहस्पतिना । राया । स्वगाकृत इति स्वगा – कृतः । मह्यम् ।

यजमानाय ( ) । तिष्ठ ॥ **18 (51)**

*(समानाना – मोषधीष्वेव पशून् – मह्यं यँजमाना – यैकञ्च)*

*(A5)*

**TS 3.5.6.1**

सं त्वा नह्यामि पयसा घृतेन सं त्वा नह्याम्यप ओषधीभिः ।

सं त्वा नह्यामि प्रजयाऽहमद्य सा दीक्षिता सनवो वाजमस्मे ॥

प्रैतु ब्रह्मणस्पत्नी वेदिं वँर्णेन सीदतु ।

अथाहमनुकामिनी स्वे लोके विशा इह ॥

सुप्रजस स्त्वा वय९ सुपत्नीरुप सेदिम ।

अग्ने सपत्नदम्भनमदब्धासो अदाभ्यं ॥

इमं ँविष्यामि वरुणस्य पाशं - [ ] **19**

**TS 3.5.6.1 - Padam**

समिति । त्वा । नह्यामि । पयसा । घृतेन । समिति । त्वा । नह्यामि ।

अपः । ओषधीभिरित्योषधि - भिः ॥ समिति । त्वा । नह्यामि ।

प्रजयेति प्र - जया । अहम् । अद्य । सा । दीक्षिता । सनवः ।

वाजम् । अस्मे इति ॥ प्रेति । एतु । ब्रह्मणः । पत्नी । वेदिम् ।

वर्णेन । सीदतु ॥ अथ । अहम् । अनुकामिनीत्यनु-कामिनी । स्वे ।

लोके । विशौ । इह ॥ सुप्रजस इति सु - प्रजसः । त्वा । वयम् ।

सुपत्नीरिति सु - पत्नीः । उपेति । सेदिम ॥ अग्ने । सपत्नदंभनमिति

सपत्न - दंभनम् । अदब्धासः । अदाभ्यम् ॥ इमम् । वीति ।

स्यामि । वरुणस्य । पाशम् । **19 (50)**

**TS 3.5.6.2**

ँयमबद्ध्नीत सविता सुकेतः ।

धातुश्च योनौ सुकृतस्य लोके स्योनं मे सह पत्या करोमि ॥

प्रेह्युदेह्यृतस्य वामीरन्वग्निस्तेऽग्रं नयत्वदितिर्मद्ध्यं ददता॒ं
रुद्रावसृष्टाऽसि युवा नाम मा मा हि॒ंसीर्वसुभ्यो रुद्रेभ्य आदित्येभ्यो
विश्वेभ्यो वो देवेभ्यः पन्नेजनीर्गृह्णामि यज्ञाय वः पन्नेजनीः सादयामि
विश्वस्य ते विश्वावतो वृष्णियावत – [ ] **20**

**TS 3.5.6.2 - Padam**

यम् । अबद्ध्नीत । सविता । सुकेत इति सु–केतः ॥ धातुः । च ।
योनौ । सुकृतस्येति सु – कृतस्य । लोके । स्योनम् । मे । सह ।
पत्या । करोमि ॥ प्रेति । इहि । उदेहीत्युत्–एहि । ऋतस्य । वामीः ।
अन्विति । अग्निः । ते । अग्रम् । नयतु । अदितिः । मद्ध्यम् ।
ददताम् । रुद्रावसृष्टेति रुद्र–अवसृष्टा । असि । युवा । नाम । मा ।
मा । हि॒ंसीः । वसुभ्य इति वसु–भ्यः । रुद्रेभ्यः । आदित्येभ्यः ।
विश्वेभ्यः । वः । देवेभ्यः । पन्नेजनीरिति पत् – नेजनीः । गृह्णामि ।
यज्ञाय । वः । पन्नेजनीरिति पत् – नेजनीः । सादयामि ।
विश्वस्य । ते । विश्वावत इति विश्व–वतः ।
वृष्णियावत इति वृष्णिय–वतः । **20 (50)**

**TS 3.5.6.3**

स्तवाग्ने वामीरनु सन्दृशि विश्वा रेता॑सि धिषीयाऽगन् देवान्. यज्ञो नि देवीर्देवेभ्यो यज्ञमशिषन्नस्मिन्थ् सुन्वति यजमान आशिषः स्वाहाकृताः समुद्रेष्ठा गन्धर्वमातिष्ठतानु ।

वातस्य पत्मन्निड ईडिताः ॥ **21**

**TS 3.5.6.3 - Padam**

तव । अग्ने । वामीः । अन्विति । सन्दृशीति सं - दृशि । विश्वा । रेता॑सि । धिषीय । अगन्न् । देवान् । यज्ञः । नीति । देवीः । देवेभ्यः । यज्ञम् । अशिषन्न् । अस्मिन्न् । सुन्वति । यजमाने । आशिष इत्या - शिषः । स्वाहाकृता इति स्वाहा - कृताः । समुद्रेष्ठा इति समुद्रे - स्थाः । गन्धर्वम् । एति । तिष्ठत । अनु ॥ वातस्य । पत्मन्न् । इडः । ईडिताः ॥ **21 (30)**

*(पाशं - वृँष्णियावत - स्त्रि॑शच्च) (A6)*

**TS 3.5.7.1**

वषट्कारो वै गायत्रियै शिरोऽछिनत् तस्यै रसः पराऽपतथ् स पृथिवीं प्राविशथ्स खदिरोऽभवद् यस्य खादिरः स्रुवो भवति छन्दसामेव

रसेनाव द्यति सरसा अस्याऽऽ*हुतयो भवन्ति तृतीयस्यामितो दिवि सोम आसीत् तं गायत्र्याऽ हरत् तस्य पर्णमच्छिद्यत तत् पर्णोऽभवत् तत् पर्णस्य पर्णत्वं ँयस्य पर्णमयी जुहू – [ ] **22**

**TS 3.5.7.1 - Padam**

वषट्कार इति वषट् – कारः । वै । गायत्रियै । शिरः । अच्छिनत् । तस्यै । रसः । परेति । अपतत् । सः । पृथिवीम् । प्रेति । अविशत् । सः । खदिरः । अभवत् । यस्य । खादिरः । स्रुवः । भवति । छन्दसाम् । एव । रसेन । अवेति । द्यति । सरसा इति स – रसाः । अस्य । आहुतय इत्या – हुतयः । भवन्ति । तृतीयस्याम् । इतः । दिवि । सोमः । आसीत् । तम् । गायत्री । एति । अहरत् । तस्य । पर्णम् । अच्छिद्यत । तत् । पर्णः । अभवत् । तत् । पर्णस्य । पर्णत्वमिति पर्ण – त्वम् । यस्य । पर्णमयीति पर्ण – मयी ।

जुहूः । **22 (50)**

**TS 3.5.7.2**

–र्भवति सौम्या अस्याऽऽ*हुतयो भवन्ति जुषन्तेऽस्य देवा आहुतीर्देवा वै ब्रह्मन्नवदन्त तत् पर्ण उपाऽ*शृणोथ् सुश्रवा वै नाम यस्य

पर्णमयी जुहूर्भवति न पाप७ श्लोक७ शृणोति ब्रह्म वै पर्णो विण्मरुतोऽन्नं ँ विण्मारुतोऽश्वत्थो यस्य पर्णमयी जुहूर्भवत्याश्वत्थ्युपभृद् ब्रह्मणैवान्नमव रुन्धेऽथो ब्रह्मै – [ ] **23**

**TS 3.5.7.2 - Padam**

भवति । सौम्याः । अस्य । आहुतय इत्या – हुतयः । भवन्ति । जुषन्ते । अस्य । देवाः । आहुतीरित्या – हुतीः । देवाः । वै । ब्रह्मन्न् । अवदन्त । तत् । पर्णः । उपेति । अशृणोत् । सुश्रवा इति सु – श्रवाः । वै । नाम । यस्य । पर्णमयीति पर्ण – मयी । जुहूः । भवति । न । पापम् । श्लोकम् । शृणोति । ब्रह्म । वै । पर्णः । विट् । मरुतः । अन्नम् । विट् । मारुतः । अश्वत्थः । यस्य । पर्णमयीति पर्ण–मयी । जुहूः । भवति । आश्वत्थी । उपभृतित्युप – भृत् । ब्रह्मणा । एव । अन्नम् । अवेति । रुन्धे । अथो इति । ब्रह्म । **23 (50)**

**TS 3.5.7.3**

-व विश्यद्ध्यूहति राष्ट्रं ँवै पर्णो विडश्वत्थो यत् पर्णमयी

जुहूर्भवत्या-श्वत्थ्युपभृद्-राष्ट्रमेव विश्यद्ध्यूहति प्रजापतिर्वा

अजुहोत् सा यत्राऽऽ*हुतिः प्रत्यतिष्ठत् ततो विकङ्कत उदतिष्ठत् ततः

प्रजा असृजत यस्य वैकङ्कती ध्रुवा भवति प्रत्येवास्या

ऽऽ*हुतयस्तिष्ठन्त्यथो प्रैव जायत एतद्वै स्रुचा( ) रूपं ँयस्यैव

रूपाः स्रुचो भवन्ति सर्वाण्येवैन रूपाणि पशूनामुपतिष्ठन्ते

नास्याप-रूपमात्मञ्जायते ॥ **24**

**TS 3.5.7.3 - Padam**

एव । विशि । अधीति । ऊहति । राष्ट्रम् । वै । पर्णः । विट् ।

अश्वत्थः । यत् । पर्णमयीति पर्ण - मयी । जुहूः । भवति ।

आश्वत्थी । उपभृतित्युप-भृत् । राष्ट्रम् । एव । विशि । अधीति ।

ऊहति । प्रजापतिरिति प्रजा - पतिः । वै । अजुहोत् । सा । यत्र ।

आहुतिरित्या - हुतिः । प्रत्यतिष्ठदिति प्रति - अतिष्ठत् । ततः ।

विकङ्कत इति वि - कङ्कतः । उदिति । अतिष्ठत् । ततः । प्रजा इति

प्र - जाः । असृजत । यस्य । वैकङ्कती । ध्रुवा । भवति । प्रतीति ।

एव । अस्य । आहुतय इत्या–हुतयः । तिष्ठन्ति । अथो इति । प्रेति ।
एव । जायते । एतत् । वै । स्रुचाम् ( ) । रूपम् । यस्य ।
एवꣳरूपा इत्येवं – रूपाः । स्रुचः । भवन्ति । सर्वाणि । एव ।
एनम् । रूपाणि । पशूनाम् । उपेति । तिष्ठन्ते । न । अस्य ।
अपरूपमित्यप – रूपम् । आत्मन्न् । जायते ॥ **24 (67)**

*(जुहू – रथो ब्रह्म – स्रुचाꣳ – सप्तदश च) (A7)*

**TS 3.5.8.1**

उपयामगृहीतोऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामि
दक्षाय दक्षवृधे रातं देवेभ्योऽग्नि जिह्वेभ्यस्त्वर्तायुभ्य
इन्द्रज्येष्ठेभ्यो वरुणराजभ्यो वातापिभ्यः पर्जन्यात्मभ्यो दिवे
त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वाऽपेन्द्र द्विषतो मनोऽप जिज्यासतो
जह्यप यो नोऽरातीयति तं जहि प्राणाय त्वाऽपानाय त्वा व्यानाय
त्वा सते त्वाऽसते त्वाऽद्भ्यस्त्वौषधीभ्यो ( ) विश्वेभ्यस्त्वा भूतेभ्यो
यतः प्रजा अक्खिद्रा अजायन्त तस्मै त्वा प्रजापतये विभूदाव्.न्ने
ज्योतिष्मते ज्योतिष्मन्तं जुहोमि ॥ **25**

**TS 3.5.8.1 - Padam**

उपयामगृहीत इत्युपयाम – गृहीतः । असि । प्रजापतय इति प्रजा–पतये । त्वा । ज्योतिष्मते । ज्योतिष्मन्तम् । गृह्णामि । दक्षाय । दक्षवृध इति दक्ष – वृधे । रातम् । देवेभ्यः । अग्निजिह्वेभ्य इत्यग्नि – जिह्वेभ्यः । त्वा । ऋतायुभ्य इत्यृतायु – भ्यः । इन्द्रज्येष्ठेभ्य इतीन्द्र–ज्येष्ठेभ्यः । वरुणराजभ्य इति वरुणराज–भ्यः । वातापिभ्य इति वातापि–भ्यः । पर्जन्यात्मभ्य इति पर्जन्यात्म–भ्यः । दिवे । त्वा । अन्तरिक्षाय । त्वा । पृथिव्यै । त्वा । अपेति । इन्द्र । द्विषतः । मनः । अपेति । जिज्यासतः । जहि । अपेति । यः । नः । अरातीयति । तम् । जहि । प्राणायेति प्रा – अनाय । त्वा । अपानायेत्यप–अनाय । त्वा । व्यानायेति वि – अनाय । त्वा । सते । त्वा । असते । त्वा । अद्भ्य इत्यत् – भ्यः । त्वा । ओषधीभ्य इत्योषधि–भ्यः ( ) । विश्वेभ्यः । त्वा । भूतेभ्यः । यतः । प्रजा इति प्र – जाः । अक्लिखद्राः । अजायन्त । तस्मै । त्वा । प्रजापतय इति प्रजा – पतये । विभूदाव्.न्न इति विभु – दाव्.न्ने ।

ज्योतिष्मते । ज्योतिष्मन्तम् । जुहोमि ॥ **25 (64)**

(*ओषधीभ्य - श्चतुर्दश च) (A8)*

**TS 3.5.9.1**

यां ँवा अद्ध्वर्युश्च यजमानश्च देवतामन्तरितस्तस्या आ वृश्च्येते प्राजापत्यं दधिग्रहं गृह्णीयात् प्रजापतिः सर्वा देवता देवताभ्य एव नि ह्नुवाते ज्येष्ठो वा एष ग्रहाणां ँयस्यैष गृह्यते ज्यैष्ठ्यमेव गच्छति सर्वासां ँवा एतद् देवताना७ रूपं ँयदेष ग्रहो यस्यैष गृह्यते सर्वाण्येवैन७ रूपाणि पशूनामुपतिष्ठन्त उपयामगृहीतो - [ ] **26**

**TS 3.5.9.1 - Padam**

याम् । वै । अद्ध्वर्युः । च । यजमानः । च । देवताम् । अन्तरित इत्यन्तः - इतः । तस्यै । एति । वृश्च्येते इति । प्राजापत्यमिति प्राजा - पत्यम् । दधिग्रहमिति दधि - ग्रहम् । गृह्णीयात् । प्रजापतिरिति प्रजा - पतिः । सर्वाः । देवताः । देवताभ्यः । एव । नीति । ह्नुवाते इति । ज्येष्ठः । वै । एषः । ग्रहाणाम् । यस्य । एषः । गृह्यते । ज्यैष्ठ्यम् । एव । गच्छति । सर्वासाम् । वै । एतत् ।

देवतानाम् । रूपम् । यत् । एषः । ग्रहः । यस्य । एषः । गृह्यते ।
सर्वाणि । एव । एनम् । रूपाणि । पशूनाम् । उपेति । तिष्ठन्ते ।
उपयामगृहीत इत्युपयाम – गृहीतः । **26 (50)**

**TS 3.5.9.2**

–ऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामीत्याह
ज्योतिरेवैन९ं समानानां करोत्यग्निजिह्वेभ्यस्त्वर्तायुभ्य
इत्याहैतावतीर्वै देवतास्ताभ्य एवैन९ं सर्वाभ्यो गृह्णात्यपेन्द्र द्विषतो
मन इत्याह भ्रातृव्यापनुत्त्यै प्राणाय त्वाऽपानाय त्वेत्याह प्राणानेव
यजमाने दधाति तस्मै त्वा प्रजापतये विभूदाव्.न्ने ज्योतिष्मते
ज्योतिष्मन्तं जुहोमी – [ ] **27**

**TS 3.5.9.2 - Padam**

असि । प्रजापतय इति प्रजा – पतये । त्वा । ज्योतिष्मते ।
ज्योतिष्मन्तम् । गृह्णामि । इति । आह । ज्योतिः । एव । एनम् ।
समानानाम् । करोति । अग्निजिह्वेभ्य इत्यग्नि – जिह्वेभ्यः । त्वा ।
ऋतायुभ्य इत्यृतायु – भ्यः । इति । आह । एतावतीः । वै । देवताः ।
ताभ्यः । एव । एनम् । सर्वाभ्यः । गृह्णाति । अपेति । इन्द्र ।

द्विषतः । मनः । इति । आह । भ्रातृव्यापनुत्त्या इति

भ्रातृव्य – अपनुत्त्यै । प्राणायेति प्र – अनाय । त्वा ।

अपानायेत्यप – अनाय । त्वा । इति । आह । प्राणानिति

प्र – अनान् । एव । यजमाने । दधाति । तस्मै । त्वा ।

प्रजापतय इति प्रजा – पतये । विभूदाव्.न्न इति विभु – दाव्.न्ने ।

ज्योतिष्मते । ज्योतिष्मन्तम् । जुहोमि । **27 (50)**

**<u>TS 3.5.9.3</u>**

–त्याह प्रजापतिः सर्वा देवताः सर्वाभ्य एवैनं देवताभ्यो

जुहोत्याज्यग्रहं गृह्णीयात् तेजस्कामस्य तेजो वा आज्यं तेजस्व्येव

भवति सोमग्रहं गृह्णीयाद्–ब्रह्मवर्चसकामस्य ब्रह्मवर्चसं ँवै सोमो

ब्रह्मवर्चस्येव भवति दधिग्रहं गृह्णीयात् पशुकामस्योग्वै दद्ध्यूर्क्

पशव ऊर्जैवास्मा ऊर्जं पशूनव रुन्धे ॥ **28**

**<u>TS 3.5.9.3 - Padam</u>**

इति । आह । प्रजापतिरिति प्रजा – पतिः । सर्वाः । देवताः ।

सर्वाभ्यः । एव । एनम् । देवताभ्यः । जुहोति ।

आज्यग्रहमित्याज्य - ग्रहम् । गृह्णीयात् । तेजस्कामस्येति

तेजः - कामस्य । तेजः । वै । आज्यम् । तेजस्वी । एव । भवति ।

सोमग्रहमिति सोम - ग्रहम् । गृह्णीयात् । ब्रह्मवर्चसकामस्येति

ब्रह्मवर्चस - कामस्य । ब्रह्मवर्चसमिति ब्रह्म - वर्चसम् ।

वै । सोमः । ब्रह्मवर्चसीति ब्रह्म - वर्चसी । एव । भवति ।

दधिग्रहमिति दधि - ग्रहम् । गृह्णीयात् । पशुकामस्येति

पशु - कामस्य । ऊर्क् । वै । दधि । ऊर्क् । पशवः । ऊर्जा । एव ।

अस्मै । ऊर्जम् । पशून् । अवेति । रुन्धे ॥ **28 (43)**

*(उपयामगृहीतो - जुहोमि - त्रिचत्वारिꣳशच्च) (A9)*

**TS 3.5.10.1**

त्वे क्रतुमपि वृञ्जन्ति विश्वे द्विर्यदेते त्रि-र्भवन्त्यूमाः ।

स्वादोः स्वादीयः स्वादुना सृजा समत ऊ षु मधु मधुनाऽभि योधि ।

उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः

प्रजापतये त्वा ॥

प्राणग्रहान् गृह्णात्येतावद् वा अस्ति यावदेते ग्रहाः स्तोमाश्छन्दा॑ᳲसि पृष्ठानि दिशो यावदेवास्ति त – [ ] **29**

**TS 3.5.10.1 - Padam**

त्वे इति । क्रतुम् । अपीति । वृञ्जन्ति । विश्वे । द्विः । यत् । एते । त्रिः । भवन्ति । ऊमाः ॥ स्वादोः । स्वादीयः । स्वादुना । सृज । समिति । अतः । उ । स्विति । मधु । मधुना । अभीति । योधि ॥ उपयामगृहीत इत्युपयाम – गृहीतः । असि । प्रजापतय इति प्रजा – पतये । त्वा । जुष्टम् । गृह्णामि । एषः । ते । योनिः । प्रजापतय इति प्रजा – पतये । त्वा ॥ प्राणग्रहानिति प्राण–ग्रहान् । गृह्णाति । एतावत् । वै । अस्ति । यावत् । एते । ग्रहाः । स्तोमाः । छन्दा॑ᳲसि । पृष्ठानि । दिशः । यावत् । एव । अस्ति । तत् । **29 (50)**

**TS 3.5.10.2**

–दव रुन्धे ज्येष्ठा वा एतान् ब्राह्मणाः पुरा विदामक्रन् तस्मात् तेषा॑ᳲ सर्वा दिशोऽभिजिता अभूवन्. यस्यैते गृह्यन्ते ज्यैष्ठ्यमेव गच्छत्यभि दिशो जयति पञ्च गृह्यन्ते पञ्च दिशः सर्वास्वेव दिक्ष्–वृद्ध्नुवन्ति

नवनव गृह्यन्ते नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधति प्रायणीये चोदयनीये च गृह्यन्ते प्राणा वै प्राणग्रहाः – [ ] **30**

## TS 3.5.10.2 - Padam

अवेति । रुन्धे । ज्येष्ठाः । वै । एतान् । ब्राह्मणाः । पुरा । विदाम् । अक्रन्न् । तस्मात् । तेषाम् । सर्वाः । दिशः ।

अभिजिता इत्यभि – जिताः । अभूवन्न् । यस्य । एते । गृह्यन्ते । ज्यैष्ठ्यम् । एव । गच्छति । अभीति । दिशः । जयति । पञ्च । गृह्यन्ते । पञ्च । दिशः । सर्वासु । एव । दिक्षु । ऋद्ध्नुवन्ति । नवनवेति नव – नव । गृह्यन्ते । नव । वै । पुरुषे । प्राणा इति प्र – अनाः । प्राणानिति प्र – अनान् । एव । यजमानेषु । दधति । प्रायणीय इति प्र – अयनीये । च । उदयनीय इत्युत् – अयनीये । च । गृह्यन्ते । प्राणा इति प्र – अनाः । वै । प्राणग्रहा इति प्राण – ग्रहाः । **30 (50)**

## TS 3.5.10.3

प्राणैरेव प्रयन्ति प्राणैरुद् यन्ति दशमेऽहन् गृह्यन्ते प्राणा वै प्राणग्रहाः प्राणेभ्यः खलु वा एतत् प्रजा यन्ति यद् वामदेव्यं

ँयोनेश्च्यवते दशमेऽहन् वामदेव्यं ँयोनेश्च्यवते

यद्–दशमेऽहन् गृह्यन्ते प्राणेभ्य एव तत् प्रजा न यन्ति ॥ 31

**TS 3.5.10.3 - Padam**

प्राणैरिति प्र – अनैः । एव । प्रयन्तीति प्र – यन्ति ।

प्राणैरिति प्र – अनैः । उदिति । यन्ति । दशमे । अहन्न् । गृह्यन्ते ।

प्राणा इति प्र – अनाः । वै । प्राणग्रहा इति प्राण – ग्रहाः ।

प्राणेभ्य इति प्र – अनेभ्यः । खलु । वै । एतत् । प्रजा इति

प्र – जाः । यन्ति । यत् । वामदेव्यमिति वाम – देव्यम् । योनेः ।

च्यवते । दशमे । अहन्न् । वामदेव्यमिति वाम – देव्यम् । योनेः ।

च्यवते । यत् । दशमे । अहन्न् । गृह्यन्ते ।

प्राणेभ्य इति प्र – अनेभ्यः । एव । तत् । प्रजा इति प्र – जाः ।

न । यन्ति ॥ **31 (37)** *(तत् – प्राणग्रहाः – सप्तविꣳशच्च) (A10)*

**TS 3.5.11.1**

प्र देवम् देव्या धिया भरता जातवेदसं ।

हव्या नो वक्षदानुषक् ॥

अयमु ष्य प्रदेवयुर्.होता यज्ञाय नीयते ।
रथो न योरभीवृतो घृणीवान् चेतति त्मना ॥
अयमग्निरुरुष्यत्यमृतादिव जन्मनः ।
सहसश्चिथ् सहीयान् देवो जीवातवे कृतः ॥
इडायास्त्वा पदे वयं नाभा पृथिव्या अधि ।
जातवेदो नि धीमह्यग्ने हव्याय वोढवे ॥ **32**

**TS 3.5.11.1 - Padam**

प्रेति । देवम् । देव्या । धिया । भरत । जातवेदसमिति जात – वेदसम् ॥ हव्या । नः । वक्षत् । आनुषक् ॥ अयम् । उ । स्यः । प्रेति । देवयुरिति देव–युः । होता । यज्ञाय । नीयते ॥ रथः । न । योः । अभीवृत इत्यभि – वृतः । घृणीवान् । चेतति । त्मना ॥ अयम् । अग्निः । उरुष्यति । अमृतात् । इव । जन्मनः ॥ सहसः । चित् । सहीयान् । देवः । जीवातवे । कृतः ॥ इडायाः । त्वा । पदे । वयम् । नाभा । पृथिव्याः । अधि ॥ जातवेद इति जात – वेदः । नीति । धीमहि । अग्ने । हव्याय । वोढवे ॥ **32 (50)**

**TS 3.5.11.2**

अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनिं ।
कुलायिनं घृतवन्तꣳ सवित्रे यज्ञं नय यजमानाय साधु ॥
सीद होतः स्व उ लोके चिकित्वान्थ्सादया यज्ञꣳ सुकृतस्य योनौ ।
देवावीर्देवान्. हविषा यजास्यग्ने बृहद्–यजमाने वयो धाः ॥
नि होता होतृषदने विदानस्त्वेषो दीदिवाꣳ असदथ् सुदक्षः ।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निः ॥

त्वं दूतस्त्व – [ ] **33**

**TS 3.5.11.2 - Padam**

अग्ने । विश्वेभिः । स्वनीकेति सु – अनीक । देवैः ।
ऊर्णावन्तमित्यूर्णा–वन्तम् । प्रथमः । सीद । योनिम् ॥ कुलायिनम् ।
घृतवन्तमिति घृत – वन्तम् । सवित्रे । यज्ञम् । नय । यजमानाय ।
साधु ॥ सीद । होतः । स्वे । उ । लोके । चिकित्वान् । सादय ।
यज्ञम् । सुकृतस्येति सु – कृतस्य । योनौ ॥ देवावीरिति
देव – अवीः । देवान् । हविषा । यजासि । अग्ने । बृहत् ।

यजमाने । वयः । धाः ॥ नीति । होता । होतृषदन इति होतृ–सदने ।

विदानः । त्वेषः । दीदिवान् । असदत् । सुदक्ष इति सु – दक्षः ॥

अदब्धव्रतप्रमतिरित्यदब्धव्रत – प्रमतिः । वसिष्ठः ।

सहस्रंभर इति सहस्रं – भरः । शुचिजिह्व इति शुचि – जिह्वः ।

अग्निः ॥ त्वम् । दूतः । त्वम् । **33 (50)**

**<u>TS 3.5.11.3</u>**

मु नः परस्पास्त्वं ँवस्य आ वृषभ प्रणेता ।

अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन् दीद्यद् बोधि गोपाः ॥

अभि त्वा देव सवितरीशानं ँवार्याणां ।

सदाऽवन् भागमीमहे ॥

मही द्यौः पृथिवी चन इमं ँयज्ञं मिमिक्षतां ।

पिपृतां नो भरीमभिः ॥

त्वामग्ने पुष्करादद्ध्यथर्वा निरमन्थत ।

मूद्ध्नो विश्वस्य वाघतः ॥

तमु – [ ] **34**

**TS 3.5.11.3 - Padam**

उ । नः । परस्पा इति परः – पाः । त्वम् । वस्यः । एति । वृषभ ।

प्रणेतेति प्र – नेता ॥ अग्ने । तोकस्य । नः । तने । तनूनाम् ।

अप्रयुच्छन्नित्यप्र – युच्छन्न् । दीद्यत् । बोधि । गोपा इति गो–पाः ॥

अभीति । त्वा । देव । सवितः । ईशानम् । वार्याणाम् ॥ सदा ।

अवन्न् । भागम् । ईमहे ॥ मही । द्यौः । पृथिवी । च । नः । इमम् ।

यज्ञम् । मिमिक्षताम् ॥ पिपृताम् । नः । भरीमभिरिति भरीम–भिः ॥

त्वाम् । अग्ने । पुष्करात् । अधीति । अथर्वा । निरिति । अमन्थत ॥

मूर्द्ध्नः । विश्वस्य । वाघतः ॥ तम् । उ । **34 (50)**

**TS 3.5.11.4**

त्वा दद्ध्यङ् ऋषिः पुत्र ईधे अथर्वणः ।

वृत्रहणं पुरन्दरं ॥

तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमं ।

धनञ्जयꣳ रणेरणे ॥

उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाऽजनि ।

धनञ्जयो रणेरणे ॥

आ यꣳ हस्ते न खादिनꣳ शिशुं जातं न बिभ्रति ।

विशामग्निꣳ स्वद्ध्वरं ॥

प्र देवं देववीतये भरता वसुवित्तमं ।

आ स्वे योनौ नि षीदतु ॥

आ – [ ] **35**

**<u>TS 3.5.11.4 - Padam</u>**

त्वा । दद्ध्यङ् । ऋषिः । पुत्रः । ईधे । अथर्वणः ॥ वृत्रहणमिति वृत्र – हनम् । पुरन्दरमिति पुरं – दरम् ॥ तम् । उ । त्वा । पाथ्यः । वृषा । समिति । ईधे । दस्युहन्तममिति दस्यु – हन्तमम् ॥ धनञ्जयमिति धनं – जयम् । रणेरण इति रणे – रणे ॥ उत । ब्रुवन्तु । जन्तवः । उदिति । अग्निः । वृत्रहेति वृत्र – हा । अजनि ॥ धनञ्जय इति धनं – जयः । रणेरण इति रणे–रणे ॥ एति । यम् । हस्ते । न । खादिनम् । शिशुम् । जातम् । न । बिभ्रति ॥ विशाम् ।

अग्निम् । स्वद्ध्वरमिति सु – अध्वरम् ॥ प्रेति । देवम् । देववीतय

इति देव – वीतये । भरत । वसुवित्तममिति वसुवित्–तमम् ॥ एति ।

स्वे । योनौ । नीति । सीदतु ॥ एति । **35 (50)**

**TS 3.5.11.5**

जातं जातवेदसि प्रियꣳ शिशीताऽतिथिं ।

स्योन आ गृहपतिं ॥

अग्निनाऽग्निः समिद्ध्यते कविर्गृहपतिर्युवा ।

हव्यवाड् जुह्वास्यः ॥

त्वꣳ ह्यग्ने अग्निना विप्रो विप्रेण सन्थ् सता ।

सखा सख्या समिद्ध्यसे ॥

तं मर्जयन्त सुक्रतुं पुरोयावानमाजिषु ।

स्वेषु क्षयेषु वाजिनं ॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्न् ।

ते ह नाकं महिमानः सचन्ते यत्र ( ) पूर्वे साद्ध्याः

सन्ति देवाः ॥ **36**

**TS 3.5.11.5 - Padam**

जातम् । जातवेदसीति जात – वेदसि । प्रियम् । शिशीत । अतिथिम् ॥ स्योने । एति । गृहपतिमिति गृह – पतिम् ॥ अग्निना । अग्निः । समिति । इद्ध्यते । कविः । गृहपतिरिति गृह – पतिः । युवा ॥ हव्यवाडिति हव्य – वाट् । जुह्वास्य इति जुहु – आस्यः ॥ त्वम् । हि । अग्ने । अग्निना । विप्रः । विप्रेण । सन्न् । सता ॥ सखा । सख्या । समिद्ध्यस इति सं – इद्ध्यसे ॥ तम् । मर्जयन्त । सुक्रतुमिति सु – क्रतुम् । पुरोयावानमिति पुरः – यावानम् । आजिषु ॥ स्वेषु । क्षयेषु । वाजिनम् ॥ यज्ञेन । यज्ञम् । अयजन्त । देवाः । तानि । धर्माणि । प्रथमानि । आसन्न् ॥ ते । ह । नाकम् । महिमानः । सचन्ते । यत्र ( ) । पूर्वे । साद्ध्याः । सन्ति । देवाः ॥ **36 (54)** ***(वोढवे – दूतस्त्वं – तमु – सीदत्वा – यत्र – चत्वारि च) (A11)***

==========================

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(पूर्ण – र्.षयो – ऽग्निना – ये देवाः – सूर्यो मा – सन्त्वा नह्यामि – वषट्कारः स खदिर – उपयामगृहीतोऽसि – यां ँवै – त्वे क्रतुं – प्रदेव – मेकादश )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(पूर्णा – सहजान् – तवाऽग्ने – प्राणैरेव – षट्त्रिꣳशत्)

**First and Last Padam of Fifth Prasnam of Kandam 3:-**

(पूर्णा – सन्ति देवाः)

**Kanda Korvai with starting Padams of 5 Prasnams of Kandam 3:**

(प्रजापति – यो वा – अग्ने – वि वै – पूर्णा – पञ्च)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां तृतीयकाण्डे पद पाठेपञ्चमः प्रश्नः समाप्तः ॥

॥ इति तृतीयं काण्डं ॥

**Details of Panchati and Padam for Kandam 3, Prasanam 5 – (TS 3.5)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 4 | 225 |
| Anuvakam 2 | 5 | 230 |
| Anuvakam 3 | 2 | 96 |
| Anuvakam 4 | 4 | 193 |
| Anuvakam 5 | 3 | 151 |
| Anuvakam 6 | 3 | 130 |
| Anuvakam 7 | 3 | 167 |
| Anuvakam 8 | 1 | 64 |
| Anuvakam 9 | 3 | 143 |
| Anuvakam 10 | 3 | 137 |
| Anuvakam 11 | 5 | 254 |
| Total → | 36 | 1790 |

**Notes:**

- **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site www.vedavms.in**